न्यायाचार्यश्रीमदुदयनाचार्यविरचितः

# आत्मतत्त्वविवेकः ।

ॐ नमो गणेशाय ।

तार्किकशिरोमणिरघुनाथकृता

## आत्मतत्त्वविवेकदीधितिः ।

श्रीगणेशाय नमः ।

ॐ नमः सर्वभूतानि विष्टभ्य परितिष्ठते ।
अखण्डानन्दबोधाय पूर्णाय परमात्मने ॥ १ ॥
निर्णीय(१) सारं शास्त्राणां तार्किकाणां शिरोमणिः ।
आत्मतत्त्वविवेकस्य भावमुद्भावयत्ययम् ॥ २ ॥

श्रीरामतर्कालङ्कारभट्टाचार्यकृता

## आत्मतत्त्वविवेकदीधितिटिप्पणी ।

श्रीकृष्णाय नमः ।

श्रीगोविन्दपदद्वन्द्वं प्रणम्य परमादरात् ।
हृदि कृत्वा च निखिलं सार्वभौमस्य सद्वचः ॥ १ ॥
आत्मतत्त्वविवेकस्य व्याख्यां दीधितिकृत्कृताम् ।
प्रकाशयति यत्नेन श्रीरामः सुधियां मुदे ॥ २ ॥

निर्णीयेति । तथा चाऽनेकशास्त्रसारनिर्णयाधीनमेवाऽऽत्मतत्त्व

---

(१) शिष्याणामुपग्रहाय स्वग्रन्थं प्ररोचयन् कीर्तये स्वस्याऽनुष्ठेयस्य च नामनी बोधय व्याख्येयग्रन्थप्रयोजनाभिधेयसम्बन्धैनैव स्वग्रन्थस्याऽपि तद्वत्तां सूचयति । निर्णीयेत्यादि । स रम् तात्पर्यम् । शास्त्राणाम्, आस्तिकनास्तिकप्रणीतानाम् । आत्मतत्त्वविवेकस्य, प्रकृते व्य ख्येयग्रन्थस्य । भावम्, अव्यक्तीभूतं तात्पर्यमाचार्यनिष्ठम् ।